योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः २६

षड्विंशः सर्गः २६

श्रीवसिष्ठ उवाच ।

इति संचिन्त्य बलवान्बलिरामीलितेक्षणः ।

दध्यौ कमलपत्राक्षं शुक्रमाकाशमन्दिरम् ।। १

सर्वस्थं चिन्तयानं तु नित्यध्यानोऽथ भार्गवः ।

चेतःस्थं ज्ञातवान् शिष्यं बलिं गुर्वर्थिनं पुरे ।। २

अथ सर्वगतानन्तचिदात्मा भार्गवः प्रभुः ।

आनिनाय स देहं स्वं रत्नवातायनं बलेः ।। ३

गुरुदेहप्रभाजालपरिमृष्टतनुर्बलिः ।

बुबुधे प्रातरर्कांशुसंबोधितमिवाम्बुजम् ।। ४

तत्र रत्नार्घ्यदानेन मन्दारकुसुमोत्करैः ।

पादाभिवन्दनैरेनं पूजयामास भार्गवम् ।। ५

रत्नार्घ्यपरिपूर्णाङ्गं कृतमन्दारशेखरम् ।

महार्हासनविश्रान्तमथोवाच गुरुं बलिः ।। ६

बलिरुवाच ।

भगवंस्त्वत्प्रसादोत्था प्रतिभेयं पुरस्तव ।

नियोजयति मां वक्तुं कार्यं कर्तुमिवार्कभाः ।। ७

भोगान्प्रति विरक्तोऽस्मि महासंमोहदायिनः ।

तत्तत्त्वं ज्ञातुमिच्छामि महासंमोहहारि यत् ।। ८

कियन्मात्रमिदं भोगजालं किमयमेव वा ।

कोऽहं कस्त्वं किमेते वा लोका इति वदाशु मे ।। ९

शुक्र उवाच ।

बहुनात्र किमुक्तेन खं गन्तुं यत्नवानहम् ।

सर्वदानवराजेन्द्र सारं संक्षेपतः शृणु ।। १०

चिदिहास्ति हि चिन्मात्रमिदं चिन्मयमेव च ।

चित्त्वं चिदहमेते च लोकाश्चिदिति संग्रहः ।। ११

भव्योऽसि चेत्तदेतस्मात्सर्वमाप्नोषि निश्चयात् ।

नो चेत्तद्बह्वपि प्रोक्तं त्वयि भस्मनि हूयते ।। १२

चिच्चेत्यकलनाबन्धस्तन्मुक्तिर्मुक्तिरुच्यते ।

चिदचेत्याखिलात्मेति सर्वसिद्धान्तसंग्रहः ।। १३

एनं निश्चयमादाय विलोकयसि हेलया ।

स्वयमेवात्मनात्मानमनन्तं पदमाप्स्यसि ।। १४

खं व्रजाम्यहमत्रैव मुनयः सप्त संगताः ।

केनापि सुरकार्येण वस्तव्यं तत्र वै मया ।। १५

राजन्यावदयं देहस्तावन्मुक्तधियामपि ।

यथाप्राप्तक्रियात्यागो रोचते न स्वभावतः ।। १६

इति कथितवताथ भार्गवेण

स्फुटजलराशिपथा महाजवेन ।

प्लुतमलिशबले नभोन्तराले

तरलतरङ्गवदाकुले ग्रहौघैः ।। १७ ।।

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे बल्युपदेशयोगो नाम षड्विंशः सर्गः ।। २६ ।।